# Shri Datta StavarAjaH

# શ્રીદત્તસ્તવરાજઃ

## Document Information

Text title : dattastavarAjaH

File name : dattastavarAjaH.itx

Category : deities_misc, dattatreya, stavarAja

Location : doc_deities_misc

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description/comments : Dattatreya Stuti Manjari, Ed. S.V. Radhakrishnashastri

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 8, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 8, 2019

*sanskritdocuments.org*

# શ્રીદત્તસ્તવરાજઃ

શ્રીગણેશાય નમઃ ।
શ્રીશુક ઉવાચ -
મહાદેવ મહાદેવ દેવદેવ મહેશ્વર ।
દત્તાત્રેયસ્તવં દિવ્યં શ્રોતુમિચ્છામ્યહં પ્રભો ॥ ૧॥

તદસ્ય વદ માહાત્મ્યં દેવદેવ દયાનિધે ।
દત્તાત્પરતરં નાસ્તિ પુરા વ્યાસેન કીર્તિતમ્ ॥ ૨॥

જગદ્ગુરુર્જગન્નાથો ગીયતે નારદાદિભિઃ ।
તત્સર્વં બ્રૂહિ મે દેવ કરુણાકર શઙ્કર ॥ ૩॥

મહાદેવ ઉવાચ-
શ‍ૃણુ વ્યાસાત્મજાત ત્વં ગુહ્યાદ્ગુહ્યતરં મહત્ ।
યસ્ય સ્મરણમાત્રેણ મુચ્યતે સર્વબન્ધનાત્ ॥ ૪॥

દત્તં સનાતનં બ્રહ્મ નિર્વિકારં નિરઞ્જનમ્ ।
આદિદેવં નિરાકારં વ્યક્તં ગુણવિવર્જિતમ્ ॥ ૫॥

નામરૂપક્રિયાતીતં નિઃસઙ્ગં દેવવન્દિતમ્ ।
નારાયણં શિવં શુદ્ધં દૃશ્યદર્શનવર્જિતમ્ ॥ ૬॥

પરેશં પાર્વતીકાન્તં રમાધીશં દિગમ્બરમ્ ।
નિર્મલો નિત્યતૃપ્તાત્મા નિત્યાનન્દો મહેશ્વરઃ ॥ ૭॥

બ્રહ્મા વિષ્ણુઃ શિવઃ સાક્ષાદ્ ગોવિન્દો ગતિદાયકઃ ।
પીતામ્બરધરો દેવઃ માધવઃ સુરસેવિતઃ ॥ ૮॥

મૃત્યુઞ્જયો મહારુદ્રઃ કાર્તવીર્યવરપ્રદઃ ।
ઓમિત્યેકાક્ષરં બીજં ક્ષરાક્ષરપદં હરિઃ ॥ ૯॥

ગયા કાશી કુરુક્ષેત્રં પ્રયાગં બદરિકાશ્રમઃ ।

એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૦॥

ગોમતી જાહ્નવી ભીમા ગણ્ડકી ચ સરસ્વતી ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૧॥

સરયૂસ્તુઙ્ગભદ્રા ચ યમુના પયવાહિની ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૨॥

તામ્રપર્ણી પ્રણીતા ચ ગૌતમી તાપનાશિની ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૩॥

નર્મદા સિન્ધુ કાવેરી કૃષ્ણવેણી તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૪॥

અવન્તી દ્વારકા માયા મલ્લિનાથસ્ય દર્શનમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૫॥

દ્વાદશ જ્યોતિર્લિઙ્ગં ચ વારાહે પુષ્કરે તથા ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૬॥

જ્વાલામુખી હિઙ્ગુલા ચ સપ્તશૃઙ્ગસ્તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૭॥

અયોધ્યા મથુરા કાઞ્ચી રેણુકા સેતુબન્ધનમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૮॥

અહોબિલં ત્રિપથગાં ગઙ્ગા સાગરમેવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૧૯॥

કરવીરમહાસ્થાનં રઙ્ગનાથં તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૦॥

એકાદશીવ્રતં ચૈવ અષ્ટાઙ્ગૈર્યોગસાધનમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૧॥

શાકમ્ભરી ચ મૂકામ્બા કાર્તિકસ્વામિદર્શનમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૨॥

વ્રતં નિષ્ઠા તપો દાનં સામગાનં તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૩॥

મુક્તિક્ષેત્રં ચ કામાક્ષી તુલજા સિદ્ધિદેવતા ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૪॥

અન્નહોમાદિકં દાનં મેદિન્યશ્વગજાન્ વૃષાન્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૫॥

માઘકાર્તિકયોઃ સ્નાનં સન્યાસં બ્રહ્મચર્યકમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૬॥

અશ્વમેધસહસ્રાણિ માતાપિતૃપ્રપોષણમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૭॥

અમિતં પોષણં પુણ્યં ઉપકારસ્તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૮॥

જગન્નાથં ચ ગોકર્ણં પાણ્ડુરઙ્ગં તથૈવ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૨૯॥

સર્વદેવનમસ્કારઃ સર્વે યજ્ઞાઃ પ્રકીર્તિતાઃ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૦॥

શાસ્ત્રષટ્કં પુરાણાનિઅષ્ટૌ વ્યાકરણાનિ ચ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૧॥

સાવિત્રી પ્રણવં જપ્ત્વા ચતુર્વેદાંશ્ચ પારગઃ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૨॥

કન્યાદાનાનિ પુણ્યાનિ વાનપ્રસ્થસ્ય પોષણમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૩॥

વાપી કૂપતટાકાનિ કાનનારોપણાનિ ચ
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૪॥

અશ્વત્થતુલસી ધાત્રી સેવેત યો નરસ્સદા ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૫॥

શિવં વિષ્ણું ગણેશં ચ શક્તિં સૂર્યં ચ પૂજનમ્ ।
એતત્સર્વં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૬॥

ગોહત્યાદિસહસ્રાણિ બ્રહ્મહત્યાસ્તથૈવ ચ ।
પ્રાયશ્ચિત્તં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૭॥

મુચ્યતે સર્વપાપેભ્યો દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૮॥

સ્વર્ણસ્તેયં સુરાપાનં માતાગમનકિલ્બિષમ્ ।
પ્રાયશ્ચિત્તં કૃતં તેન દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૩૯॥

સ્ત્રીહત્યાદિકં પાપં બાલહત્યાસ્તથૈવ ચ ॥ ૪૦॥

પ્રાયશ્ચિત્તં કૃતં તેન સર્વપાપપ્રાણાશનમ્ ।
બ્રહ્મત્વં લભ્યતે જ્ઞાનં દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૪૧॥

કલિદોષ વિનાશાર્થં જપેદેકાગ્રમાનસઃ ।
શ્રી ગુરું પરમાનન્દં દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૪૨॥

દત્ત દત્ત ત્વિદં વાક્યં તારકં સર્વદેહિનામ્ ।
શ્રદ્ધાયુક્તો જપેન્નિત્યં દત્ત ઇત્યક્ષરદ્વયમ્ ॥ ૪૩॥

કેશવં માધવં વિષ્ણું ગોવિન્દં ગોપતિં હરિમ્ ।
ગુરૂણાં પઠ્યતે નિત્યં તત્સર્વં ચ શુભાવહમ્ ॥ ૪૪॥

નિરઞ્જનં નિરાકારં દેવદેવં જનાર્દનમ્ ।
માયામુક્તં જપેન્નિત્યં પાવનં સર્વદેહિનામ્ ॥ ૪૫॥

આદિનાથં સુરશ્રેષ્ઠં કૃષ્ણં શ્યામં જગદ્ગુરુમ્ ।
સિદ્ધરાજં ગુણાતીતં રામં રાજીવલોચનમ્ ॥ ૪૬॥

નારાયણં પરં બ્રહ્મ લક્ષ્મીકાન્તં પરાત્પરમ્ ।
અપ્રમેયં સુરાનન્દં નમો દત્તદિગમ્બરમ્ ॥ ૪૭॥

યોગિરાજોઽત્રિવરદઃ સુરાધ્યક્ષો ગુણાન્તકઃ ।
અનસૂયાત્મજો દેવો દેવો ગતિપ્રદાયકઃ ॥ ૪૮॥

ગોપનીયં પ્રયત્નેન યદિ દેવમુનીશ્વરૈઃ ।
સમસ્તઋષિભિઃ સર્વૈઃ ભક્ત્યા સ્તુત્વા મહાત્મભિઃ ॥ ૪૯॥

નારદેન સુરેન્દ્રેણ સનકાદ્યૈર્મહાત્મભિઃ ।
ગૌતમેન ચ ગાર્ગેણ વ્યાસેન કપિલેન ચ ॥ ૫૦॥

વામદેવેન દક્ષેણ અત્રિભાર્ગવમુદ્ગલૈઃ ।
વસિષ્ઠપ્રમુખૈઃ સર્વૈઃ ગીયતે સર્વદાદરાત્ ॥ ૫૧॥

વિનાયકેન રુદ્રેણ મહાસેનેન વૈ સદા ।
માર્કણ્ડેયેન ધૌમ્યેન કીર્તિતં સ્તવમુત્તમમ્ ॥ ૫૨॥

મરીચ્યાદિમુનીન્દ્રૈશ્ચ શુકકર્દમસત્તમૈઃ ।
અઙ્ગિરાકૃતપૌલસ્ત્યભૃગુકશ્યપજૈમિની ॥ ૫૩॥

ગુરુસ્તવમધીયાનો વિજયી સર્વદા ભવેત્ ।
ગુરોઃ સાયુજ્યમાપ્નોતિ ગુરોર્નામ પઠેદ્બુધઃ ॥ ૫૪॥

ગુરોઃ પરતરં નાસ્તિ સત્યં સત્યં ન સંશયઃ ।
ગુરોઃ પાદોદકં પીત્વા ગુરુનામ સદા જપેત્ ॥ ૫૫॥

તેઽપિ સંન્યાસૈનો જ્ઞેયાઃ ઇતરે વેષધારિણઃ ।
ગઙ્ગાદ્યાઃ સરિતઃ સર્વે ગુરોઃ પાદામ્બુજે સદા ॥ ૫૬॥

ગુરુસ્તવં ન જાનાતિ ગુરુનામમુખેન હિ ।
પશુતુલ્યં વિજાનીયાત્સત્યં સત્યં મહામુને ॥ ૫૭॥

ઇતિ સ્તોત્રં મહાદિવ્યં સ્તવરાજં મનોહરમ્ ।
પઠનાચ્છ્રવણાદ્વાપિ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૫૮॥

ઇતિ શ્રીમન્મહાદેવશુકસંવાદે દત્તસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by Sunder Hattangadi sunderh at hotmail.com

---

*Shri Datta StavarAjaH*

pdf was typeset on December 8, 2019

Please send corrections to *sanskrit@cheerful.com*